# संस्कृतसाहित्यसम्बन्धीनि केरलीयकलारूपाणि

## 4th Sem. Common Course Sanskrit

Dr.Justin George
Asst.Professor, Department of Sanskrit
Little Flower College Guruvayoor

# कलायाः चरितम्

- जीवितानुभवेभ्यः आगताः विचाराः तत्संबद्धाङ्गविक्षेपादयः स्वेदरोमाञ्चादयश्च नृत्तगीतादिषु प्रकटिताः वर्तन्ते।
- यत्पूर्वं प्राकृतरूपेष्वासीत् तत्सर्वं गच्छता कालेन संविधानचमत्कारकारणैः सुन्दररूपं प्राप्नोत्।
- यदा अभिज्ञैः तत्सर्वं शास्त्रीयविधानक्रमेषु तथा रीतिषु च स्थिरीकृतं तदा तेषां शास्त्रत्वं सिद्धम्।
- CLASSICAL ART FORMS ( NATYASASTRAM )& NON CLASSICAL ARTFORMS (FOLK ART FORMS AND OTHER ART FORMS )

# कलायाः चरितम्

- SAMANYAKALAS & VISESHKALAS
- कलाशब्दस्य बहवः अर्थाः सन्ति।
- कं लाति इति, कलयति इति,

- **न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
- **नासौ योगे न तत्कर्म नाट्येऽस्मिन् यन्न विद्यते।।**

# कलायाः चरितम्

- श्रीमता के.पी.नारायणपिषारोटिमहाभागेन स्वकीये ग्रन्थे एवं लिखितम् ‘कलेति पदस्य सृष्टिरित्यर्थः’।

- डा.ई.पी.श्रीदेवीवर्यया कूटियाट्टनाट्यकला इति ग्रन्थे कलायाः लक्षणमेवम् उच्यते,
‘नित्यनूतनचमत्कारेणाह्लादजनिका सृष्टिः कला।

# कलायाः चरितम्

- भारते कला यथार्थचिदानन्दसाक्षात्कारस्य माध्यमम्।
- कलारूपाणां प्रभवस्थानं देवालयः अभवत्
- ईश्वराराधनं कला च परस्परपूरकत्वेन प्रगतिं प्रापतुः

# केरलीयदृश्यकला:

- ग्रामीणकलारूपाणि तथा शास्त्रीयकलारूपाणि।
- रङ्गप्रयोज्यकला अनुष्ठानकला
- आर्यद्राविडसंस्कारस्य मिश्रितरूपाः एव केरलीयकलाः।
- ईश्वरप्रीतयेऽनुष्ठीयमाना कलानुष्ठानकला।

- ग्रामीणरङ्गप्रयोज्यकलासु आर्द्राकेलिः(तिरूवातिरक्कलि इति कैरल्याम्) मार्गम्क्कली, ओप्पन्ना इत्याद्याः कलाः विचार्यन्ते।

# कलायाः चरितम्

- ग्रामीणानुष्ठानरङ्गप्रयोज्यकलारूपेषु उत्तरकेरलस्य तेय्यम्-कलारूपम्, मध्यकेरलस्य मुटियेट्ट्-कलारूपम्, दक्षिणकेरलस्य पटयणि-कलारूपमित्यादीनि

- शास्त्रीयरङ्गप्रयोज्यकलासु कथाकेलिः, मोहिनियाट्टम्, तुल्लल् इत्यादीनि कलारूपाणि विचार्यन्ते।

# शास्त्रीयानुष्ठानकलारूपाणि

- यत्र नानाविधाः भक्त्याद्याद्दतक्रमाः नियतरूपेण आदावन्ते च वर्तन्ते ता अनुष्ठानकलाः। एतासां देवालयेष्वेव प्रयोग आसीत्। 'ईश्वरप्रीतयेऽनुष्ठीयमाना कला अनुष्ठानकला। विघ्नं विना नियमेन यथाविधि करणीयत्वमनुष्ठातव्यमिति यावत्'।

- कूटियाट्टम्, कृष्णनाट्टम्, नङ्यार्कूत्त्, चाक्यार्कूत्त् इत्यादीनि कलारूपाणि

# संस्कृतसाहित्यसम्बन्धीनि केरलीयकलारूपाणि

- **इतिहासः**
- **साहित्यम्**
- **वेदिका**
- **अभिनयः**
- **क्रमः**

# कूटियाट्टम्-चित्रफलकाङ्कम्



# कूटियाट्टम्

- संस्कृतनाटकाभिनयसम्प्रदायेषु अतिप्राचीनतमं कलारूपं भवति कूटियाट्टम्।
- युनेस्कोसंस्थया (UNESCO) अङ्गीकृतम्
- सङ्घं कृत्वा अथवा सङ्घीकुर्वत् नृत्तम् आट्टम् वा कूटियाट्टम् इति शब्दव्युत्पत्तिः।
- चाक्यार् नम्ब्यार्-वंशीयाभ्यामेव (पुरुषकथापात्राणि चाक्यार् वंशीयपुरुषैरेव स्त्रीकथापात्राणि नम्ब्यार् स्त्रीभिरेव च)अभिनेयत्वाच्च कूटियाट्टम् इति नाम्नः सार्थकता भवति।

# कूटियाट्टम्

- श्री. के.पि. नारायणपिषारोटि माहाभागस्य अभिप्राये ‘एकाभिनयः कूत्त्, अनेकाभिनयः कूटियाट्टमिति’।
- आधिकारिकग्रन्थौ आट्टप्रकारः, क्रमदीपिका च भवतः।

# कूटियाट्टम्-इतिहासः

- सङ्घकालसाहित्ये तथा इतरप्राचीनद्राविडकृतिषु विशिष्य चिलप्पतिकारमिति नामके काव्ये च कूत्त् नामककलारूपस्य प्रकटनांशयुक्तं नृत्तविशेषणादिकं वर्णितं दृश्यते।

- ए.डि अष्टमे शतके शक्तिभद्रस्य आश्चर्यचूडामणिः, महेन्द्रविक्रमस्य मत्तविलासप्रहसनम्, बोधायनस्य भगवदज्जुकम् इत्यादीनि रूपकाणि केरलेषु कूटियाट्टकलारूपेण प्रकटयन्ते स्म। नवमे शतके नीलकण्ठस्य कल्याणसौगन्धिकम् कूटियाट्टत्त्वेन मञ्जीकृतम्।

# कूटियाट्टम्-इतिहासः

- कुलशेखरेण विरचतयोः सुभद्राधनञ्जयम्, तपतीसंवरणम्, इत्यनयोः नाटकयोः रंगपाठः अनेनैव निर्मितः। ततः ते नाटके कूटियाट्टत्वेन रङ्गे प्रदर्शिते च। एतदर्थं कुलशेखरेण विरचितः ग्रन्थः भवति 'व्यङ्ग्यव्याख्या'।

- तोलेन विरचितौ ग्रन्थतल्लजौ भवतः आट्टप्रकारम्, क्रमदीपिका च

# कूटियाट्टम्-इतिहासः

- कूटियाट्टे अभिनयं कुर्वन्तः चाक्यार् जनाः, मिषाव् वाद्ये प्रयोगं कुर्वन्तः तथा वेषं धारयन्तः च नम्ब्यार् समुदायगताः, एवं तालवाद्यं कुर्वन्तः स्त्रीवेषं धरन्तः च नङ्यार् समुदायगताः इति।
- अष्टादश चाक्यार्गृहाणि एव आसन्।
- पोतियिल्, चेरियपरिषा, वलियपरिषा, अम्मन्नूर् , कुट्टन्चेरि, कोय्प, पैंकुलम्, माणि च।

# कूटियाट्टम्-इतिहासः

- कूटियाट्टकलारूपस्य पुरोगत्यै यत्नं कृतवन्तः त्रयः आचार्याः भवन्ति अम्मन्नूर चाचुचाक्यार्, किडङ्गूर नारायण चाक्यार, पैङ्कुलं रामचाक्यार्, च।
- कलामण्डलस्य उत्पत्तेः पश्चात् कलारूपमिदं पठनविषयत्वेन जनकीयतां प्राप्नोत्।
- १९५५ तमे पैङ्कुलम्-रामचाक्यार कोषिक्कोट् नागर्यां तथा अनन्तपुर्यां साहित्यपरिषदः वार्षिकाघोषावसरे च अभिज्ञानशाकुन्तलस्य द्वितीयमङ्कं कूटियाट्टत्वेन प्राकटयत्। अनेन सह केरलेषु कूटियाट्टस्य प्रचारमुखे विप्लवात्मकता समजायता।

# साहित्यम्

- संस्कृतरूपकाणां रंगपाठः एव कूटियाट्ट्साहित्यत्वेन उपयुज्यन्ते। तोलविरचितयोः आट्टप्रकारं, क्रमदीपिका इत्येतयोः शास्त्रग्रन्थयोः साह्येन संस्कृतरूपकाणां रंगपाठः सज्जीक्रियते।

- विषयाः भासविरचितस्य प्रतिमारूपकस्य विच्छिन्नाभिषेकाङ्कः, प्रतिमाङ्कः, अटव्यङ्कः, रावणाङ्कः, भरताङ्कः, अभिषेकाङ्कः इत्यादयो भवन्ति।

# कूटियाट्टम्

- एवं च अभिषेकनाटकस्य बालिवधम्, तोरणयुद्धम्, मायासीताङ्कः, प्रतिज्ञायौगन्धरायणस्य मन्त्राङ्कः, महासेनाङ्कः, स्वप्नवासवदत्तस्य ब्रह्मचर्याङ्कः, चित्रफलकाङ्कः, चारुदत्तस्य वसन्तसेनाङ्कः, श्रीहर्षविरचितस्य नागानन्दस्य द्वितीयाङ्कः, शक्तिभद्रस्य आश्चर्यचूडामणेः पर्णशालाङ्कः, शूर्पणखाङ्कः, मायासीताङ्कः, जडायुवधाङ्कः, अशोकवनिकाङ्कः, अङ्कुलीयकाङ्कः, कुलशेखरवर्मणा विरचितं सुभद्राधनञ्जयम्, तपतीसंवरणम् इत्यादीनि अपि कूटियाट्टस्य साहित्यरूपेण विराजन्ते। अपि तु ऊरुभङ्गः, मध्यमव्ययोगः, अविमारकम् इत्यादीनि भासरूपकाण्यपि कूटियाट्टे उपयुज्यन्ते।

# भीमसेनः कल्याणसौगन्धिकव्यायोगः



# बाली - तारा



# कूटियाट्टम्

- कलारूपेऽस्मिन् श्लोकोच्चारणस्य श्रुतिः(vocal rendition)'स्वरिक्कल्' इत्येवं कैरल्यां कथ्यते।

- सामान्येन चतुर्विंशतिरागाः एतन्निमित्तं कूटियाट्टे उपयुज्यन्ते। ताः तु अन्तरी, आर्त्तन्, हिन्दोलम्, कोरकुरिञ्ञी, कैशिकी, घट्टन्तरी, चेटीपञ्चमम्, मूढन्, मुरलीन्दलं, तर्कन्, तोण्डा, ओणं, दुःखगान्धारं, पौराली, पुरनीर्मै, भिन्नपञ्चमम्, वीरतर्कन्, वेलाधूली, श्रीकण्ठि, श्रीकामरं, स्वलपन्तिरी, विमला, विराटी, वीरपञ्चमम् इत्येते भवन्ति।

# वेदिका

- कूत्तम्पलम् अथवा नाट्यगृहम्

- वेदिकायाः पुरतः मध्यभागे दीपः स्थाप्यते पृष्ठतः मध्यभागे मिष़ाव् , तिमिला, इटक्का, कुष़ल्(वाद्योपकरणानि) इत्यादीनि वेदिकायाः पुरतः मध्यभागे दीपः स्थाप्यते पृष्ठतः मध्यभागे मिष़ाव् , तिमिला, इटक्का, कुष़ल्(वाद्योपकरणानि) इत्यादीनि

# क्रमः

- रंगविधानम्,
- मिष़ाव् मुखरणं (मिषाव् ओच्चपेटुत्तल् इति कैरलीभाषायां) गोष्ठीवाचनं (गोष्ठीकोट्टल्),
- स्तुतिपाठनं (अक्कित्तचोल्लल्),
- नान्दीनिर्वहणम्,
- रंगपूजनम् (अरङ्तलिक्कल्),
- निर्वहणम्,
- कूटियाट्टम् मंगलश्लोकश्च।

# अभिनयः

- चतुर्विधाभिनयाः
- आङ्गिकाभिनयः- हस्तमुद्राः अङ्गविक्षेपाः, उपाङ्गविक्षेपाः च आङ्गिकाभिनयस्य घटकाः भवन्ति।

- वाचिकाभिनयः- कथापात्राणां वाङ्मयः व्यवहारः वाचिक इति वक्तुं शक्यते।-उत्तमकथापात्रेभ्यः संस्कृतम्, इतरेभ्यः प्राकृतमिति उपयुक्तभाषायाः काचन व्यवस्था निश्चिता अस्ति।

# अभिनयः

- सात्त्विकाभिनयः- नाट्यं सत्वे प्रतिष्ठितम् इति भरतमुनिना उक्तम्। कथापात्राणां मानसिकाविष्कारः एव सात्त्विकाभिनयः।
- नेत्राभिनयः एव अधिकतया उपयुज्यते।
- आहार्याभिनयः- कथापात्रानुगुणं वेषान् धर्तुम् आहार्याभिनये शक्यते।
- सत्वरजोतमोगुणानां आधारेण पच्च, कत्ति, करि, ताटि, मिनुक् इत्यादि वेषभेदाः च कूटियाट्टकलारूपे सन्ति।

# बाली



# संक्षेपः

- नवदशशतके परिक्षीणमुखं प्राप्तवतः कूटियाट्टकलारूपस्य पुनरुत्थानमेव विंशतिशतके द्रष्टुम् शक्यते। १९४९ तमे नाट्यमण्डपात् बहिः आगतम् इदं कलारूपं वारणासी, उज्जयिनी प्रभृतीषु भारतस्य महानगरेषु तथा फ्रान्स्, जर्मेनी इत्यादि राष्ट्रान्तरेषु च प्रदर्शितमभवत्। १९६५ तमे वर्षे कलामण्डले कूटियाट्टस्याध्ययनं आरब्धम्।
- इरिङ्ङालकुटा गुरुकुलम्, तिरुवनन्तपुरम् मार्गी कलाकेन्द्रम्, तृप्पुणित्तुरायाम् आरब्धम् राष्ट्रान्तरीय-कूटियाट्टपठनकेन्द्रम्

# चाक्यार्कूत्त्



# चाक्यार्कूत्त्

- कूत्त् इति पदस्य नृत्तं, विनोदः, नाटकम् इत्यादि अर्थाः सन्ति। कूर्द् इति धातोः निष्पन्नं कूर्दनं इति पदम्। तस्मादेव कूत्त् इति कैरलीभाषाशब्दस्य निष्पत्तिः।
- चिलप्पतिकाराख्ये संघकृतिविशेषे कूत्त्-कलारूपमधिकृत्य नैके परामर्शाः।
- कूत्त् प्रधानतया त्रिधा विभज्यते प्रबन्धं-कूत्त्, नङ्यार्-कूत्त्, कूटियाट्टम् चेति।

# चाक्यार्कूत्त्

- प्रबन्धं कूत्त् मध्ये संस्कृतप्रबन्धानां व्याख्यानमेव कुरुते। तत्र वाचिकाभिनयस्य प्राधान्यं प्रकल्प्यते।

- किन्तु नङ्यार्-कूत्त् मध्ये अभिनयस्य प्राधान्यं वर्तते।

- कूटियाट्ट्म् तु चाक्यार्-जनैः नङ्यार्-जनैः च अवतार्यमाणः संस्कृतनाटकाभिनयः भवति।

# इतिहासः

- कूटियाट्टे कलारूपे विदूषकस्य वेषं कुर्वता नटेन हास्यरसप्रधानेन संभाषणेन आस्वादकेषु धर्मबोधम् उत्पादयितुं शक्यते । विदूषकस्य हास्यरसाभिनयं सर्वे इच्छन्ति च। अत एव नायकादपि विदूषकस्य प्राधान्यं कूटियाट्टकलारूपे समापन्नम्। पश्चात् स्वतन्त्रकलारूपत्वेन परिणतं कूत्तकलारूपं विदूषककूत्त् इति नाम्ना ख्यातिं प्राप।

# चाक्यार्कूत्त्

- नाटकादिषु विदूषकः हास्यवचनकारी नायकहितप्रवर्तकश्च।

- चाक्यार् समुदायकैः जनैः इदम् कलारूपम् अवतार्यते इत्यस्मात् पश्चात् कलारूपमिदं चाक्यार्कूत्त् इति नाम्ना ख्यातिमलभत।

# चाक्यार्कूत्त्

- चाक्यार् इति पदस्य निष्पतिमधिकृत्य भिन्नमतानि सन्ति। श्लाघ्यगीर्, शाक्यार्, चाक्यार् इत्यादि पदानि चाक्यार् पदेन सह साम्यं कल्पयन्ती पदानि भवन्ति। श्लाघ्यगीर् इति पदस्य परिणतरूपं भवति चाक्यार् इति पदम् इत्येव अम्मामन् तम्पुरान् अभिप्रैति।
- पौराणिकः सूतः इति सङ्कल्पे विदूषकवेषं धृत्वा नर्मपरिहासवर्चोभिः चाक्यार् जनेन क्रियमाणं पुराणकथाकथनं भवति चाक्यार्कूत्त्। अस्य ‘प्रबन्धं कूत्त्’ इत्यपि नामान्तरं वर्तते।

# चाक्यार्कूत्त्

- मेल्पुत्तूर् नाराणभट्टपादः, अश्वतितिरून्नाल्, एटवट्टिक्काव् नम्पूतिरि इत्येतेषां प्रमुखानां प्रबन्धाः एव चाक्यार्जनैः कलारूपप्रकटनाय अधिकतया आश्रिताः।
- अस्माकं भाषा, साहित्यम्, कला, संस्कृतिः इत्यादीनां कालोचिताभिवृद्ध्यर्थं कूत्त् कलारूपस्य भागभागित्वम् अत्यन्तम् आदरणीयं वर्तते।
- तेषां वाक्यानि केरलीयानां गद्यसाहित्यस्य प्राचीनरूपाणि भवन्ति

# चाक्यार्कूत्

- हास्यरूपेण असत्पथचारिणो सत्पथानयनमेव। चाक्यार्जनानां प्रथमं लक्ष्यं तु इदं भवति यत् कलाप्रकटनसन्दर्भे समूहस्य दोषान् संसूच्य तान् विमृश्य तेषां शुद्धीकरणम् इति।

- चाक्यार्जनस्य वचांसि अध्यापकस्याध्यापनमिव, पत्रिकाधिकारिणः सम्पादकीयमिव, अभ्युदयाकांक्षिणां हितोपदेश इव, धर्माचार्यस्य प्रभाषणमिव, साहित्यतत्त्वज्ञस्य उक्तिरिव च फलप्रदानि भवन्ति। एतदर्थं चाक्यार्जनाः काव्येभ्यः साहित्यांशान् स्वीकृत्य प्रादेशिकभाषायां तस्य सम्यक् व्याख्यानं कुर्वन्ति ।

# चाक्यार् (नटः)

- नटः अथवा नर्तकः
- चाक्यार्-विभागः बुद्धधर्मावलम्बिनः इत्यपि परामर्शः दृश्यते।
- बौद्धीयानां विश्वासानुसारं नाट्यकलाः उद्धर्तुं शाक्यमुनिना कश्चन विभागः नियुक्तः अभवत्। ते विभागीयाः चाक्यार् इति कथ्यन्ते। इमे विभागीयाः काव्यपुराणादीनां व्याख्याने निर्दिष्टाः अभवन्। एवं व्याख्यानैः सह एभिः क्रियमाणं नृत्तम् चाक्यार्कूत्त् इति नाम्ना प्रथितं च। अस्य भागिनः शाक्यार् इति च। पश्चात् शाक्यार् चाक्यार् इति च ख्यातिम् अवाप।

# चाक्यार् (नटः)

- ‘श्लाघ्यगीर्’ इति शब्दात् निष्पन्नः चाक्यार् इति पदमिति। श्लाघ्यगीर् इत्यस्य अभिनन्दनीया वाक् इत्येव अर्थः। आदरणीयं व्यक्तित्वम् इति लक्ष्यार्थः। एवं चाक्यार् इति पदस्य व्याख्यनद्वयम्।

# साहित्यम्

- चाक्यार्कूत्त् कलारूपस्य साहित्यं चम्पूप्रबन्धाः भवन्ति। प्रबन्धो नाम प्रकर्षेण बन्धः इति व्युत्पतिः।
- चम्पूकाव्य-चम्पूप्रबन्धयोः भेदः
- रङ्गक्रियासाफल्यमिति मुख्योद्देश्यं पुरतो निधाय सन्दर्भोचितानाम् इतरकाव्येषु विद्यमानानां श्लोकानां स्वीकरणमपि प्रबन्धेषु वर्तते।
- मेल्पत्तूर भट्टपादः कुट्टन्चेरि इरविचाक्यार्वर्यः च।
- **अनुनासिकरहितानि व्यतनोदेतानि पद्यगद्यानि ।**
- **नारायणाभिधानो द्विजपोतो रविनटेश्वरादेशात् ।।**मेल्पत्तूर् नारायणभट्टपादस्य प्रबन्धरचनया इतरे प्रबन्धाः अस्तंगताः नारायणप्रबन्धाः प्रचारतां गताश्च।

# वेदिका

- चाक्यारकलारूपस्य वेदिका अथवा केलीमण्डपम् कूत्तम्पलम् (Temple theatre-नाट्यगृहम्) भवति। यदि मन्दिरेषु केलीमण्डपः नास्ति, तर्हि मन्दिरस्य अन्तः कृतकरूपेण वेदी उचितरीत्या निर्मीयते।
- वेदिकायाः मध्यस्थाने दीपं त्रिभिः वर्तिकाभिः ज्वलन् स्थाप्यते। वर्तित्रयं त्रिमूर्तीनां सान्निध्यं सूचयति। वेदिकायाः पृष्ठतः मध्यभागे मिष़ाव् वाद्यकारः तिष्ठति। अस्मिन् कलारूपे एकमेव प्रधानवाद्यं भवति तत्तु मिष़ाव् एव । कांस्यतालमपि उपयुज्यते।

# वेदिका

- केरलेषु कूटल्माणिक्यम्, वटक्कुन्नाथन्, गुरुवयूर्, पेरुमनम्, हरिप्पाट्, तिरुन्नक्करा, कोट्टयम्, तिरुवारप्प्, किडङ्ङूर् इत्यादिषु मन्दिरेषु कूत्तम्बलम् (नाट्यगृहम्) नाम मण्डपाः सन्ति। कूत्-परम्प् इति नाम्ना प्रथिताः प्रदेशाः अपि केरलेषु सन्ति। एषु प्रदेशेषु संस्कृतनाटकानि कृतानि आसन्। अतः प्रदेशस्यास्य इदं नाम प्राप्तमिति ऐतिह्यम्। तृप्रयार् मन्दिरात् बहिः श्रीहर्षस्य नागानन्दनाटकस्य गरुडागमनम् प्रदर्श्यते स्म। ततःपश्चात् प्रदेशोऽयम् परक्कुम्-कूत्-परम्प् (डयनप्रदेशः) इत्यभिधीयते।

# क्रमः

- मिष़ाव् वाद्यस्य शब्दकरणं, तोटयं, विदूषकस्य स्तोभकरणम्, ईश्वरप्रार्थना, कथाप्रस्तावः, कथाप्रवेशः, कूत्त् मुटिक्कल् (कूत्संहृतिः) इत्यादयः प्रकटनक्रमे भवन्ति।
- कथापात्रस्य अभिनयेन सह नर्मसम्भाषणानां कृतेऽपि महत्त्वं प्रददाति।
- **माधुर्यमक्षरव्यक्तिः पदव्यक्तिश्च सुस्वरः**
- **स्थैर्यं लघुमतत्वं च षडेते वाचकाः गुणाः।।**

# चाक्यार्कूत्

- यदि येन केनापि चाक्यार्जनः नियन्त्रितः तर्हि वेदिकातः स्वच्छन्दं बहिर्गन्तुमपि चाक्यार्जनस्य स्वातन्त्र्यम् अस्ति। कूत् प्रवर्तमाने येन केनापि प्रकारेण कलारूपस्य विघ्नः जायते तर्हि तत्तु देवताकोप इति परिकल्प्यते स्म।

# अभिनयः

- चतुर्णाम् आङ्किकवाचिकसात्त्विकाहार्याणां अभिनयानां अवसराः सन्ति।

- **वाचिकाभिनयः -** आद्यं कथासंक्षेपः प्रतिपाद्यते। पूर्वकथां संक्षेपेण प्रतिपाद्य श्लोकैः प्रस्तुतकथा प्रस्ताव्यते। परं अन्वयार्थः तदनु व्याख्यानम् इत्यैव क्रमेण अभिनयरीतिः प्रवर्तते। श्लोकस्य अन्वयानुगुणम् अथवा अन्वयस्य क्रमानुगुणं कथा प्रतिपाद्यते। क्रियापदप्राधान्येनैव कलारूपेऽस्मिन् अन्वयः क्रियते। कर्ता कर्म क्रिया इत्यादि क्रमेणापि अन्वयकरणं सामान्येन विधीयते।

# अभिनयः

- **वाचिकाभिनयः -** प्रदर्शनावसरे सामकालिकविषयाणां प्रस्तुतिरपि रुचिकरा भवति। कूटियाट्टकलारूपस्य विदूषकेण प्रादेशिकश्लोकानां उच्चारणम् अभिमतम्। किन्तु कूत्त् कलारूपे चाक्यार्जनेन संस्कृतश्लोकाः एव उच्चार्यन्ते। श्लोकानां व्याख्यानं प्रादेशिकभाषायां भवितुमर्हति।
- उदा- धिक् पाण्डुपुत्रचरितं........

# राजसूयप्रबन्धः

- धिक् पाण्डुपुत्रचरितं स्थविरप्रमाणं
  बालप्रमाणमपि कष्टमहो विनष्टम्।

हे धर्मज द्रुपदजामपि पृच्छ कार्ये
  नारीप्रमाणमपि तेऽस्त्विह राज्यतन्त्रम्

# राजसूयप्रबन्धः

- क्रमोत्क्षुभितरूक्षतरामर्षोत्कर्षभृशतरधर्षितात्मा हरित्राकृतविचित्रमणिप्रकाण्डैः सह प्रकामलोहिनीं प्रभां नयनाभ्यामुद्वमन् नृपकुञ्जरोन्मुक्तदानतोयैः समं समुन्मिषितघर्मजलोर्मिवर्मितमूर्तिरखिलजनहर्षोल्लासहासैः सह गम्भीराट्टहा समुद्घटयन् जनसञ्चयरोमाञ्चैः सहाञ्चितमणिपीठपृष्ठान् समुतिष्ठन् अर्ध्यनवाप्तिदुर्भगतरौ करो निर्भररोषान्निर्भङ्क्तुकाम इव मुहुर्मुहुरुन्मर्दयन्

# सात्त्विकाभिनयः

- कथापात्रस्य अन्तर्हितं अभिज्ञाय भावानुगुणं प्रादेशिकभाषायां शब्दे च व्यतियानं विधाय कथापात्रं प्रेक्षकमनस्सु प्रापयितुं विधीयमानः अभिनयः भवति सात्त्विकाभिनयः।

- भगवद्दूतकथाप्रतिपादने दुर्योधनः श्रीकृष्णं बध्नाति, दुर्योधनस्य स्थैर्यम्, दुःशासनः, कर्णः, धृतराष्ट्र सन् चकितः, एक एव चाक्यार्-जनः निमेषाभ्यन्तरे बहूनि कथापात्राणि अभिनयति

# आहार्याभिनयः

- वेषविधानमेव आहार्याभिनयः। द्वन्दकेशः, वासिकः, ललाटपट्टा अथवा पिञ्छपट्टा, रक्ताम्बरं इत्यादि भूषणानि शिरसि धर्तव्यानि भवन्ति। श्रोत्रे श्रोत्रपुष्पं अथवा कर्णाभरणं भवेत्। अपरस्मिन् कर्णे ताम्बूलं स्थाप्यते। हस्ते मणिबन्धे कटकं धरति। कट्यां पृष्टतः वीचीवत् उत्तरवेष्टी च उपयुज्यते। पुरतः अवलम्बिता वेष्टिः पोय्तकम् इति कैरल्यां कथ्यते। कट्यां उत्तरवेष्टयाः तथा पोय्तकस्य उपरि कटीसूत्रं बध्नाति। तस्योपरि उपरिवस्त्रं च धरति। कथापात्रस्य कृते बृहत्तमं उपनयनसूत्रं अत्यन्तापेक्षितम् वर्तते।

# आहार्याभिनयः

- मुखे वक्षसि च भस्मधारणं तिलकधारणं च भवेत्। तण्डुलचूर्णं, कृष्णचूर्णं, हरीद्राचूर्णं, सुधाचूर्णम् इत्यादिभिरेव मुखलेपनं क्रियते। नेत्रं परितः कृष्णलेपनं क्रियते। ललाटे नासिकाग्रे कपोलद्वये चिबुके च रक्ततिलकं ध्रियते दर्शनमात्रे एव प्रेक्षकेषु हास्यम् उत्पादयितुं श्मश्रोः एकमग्रम् उपरि अग्रापरम् अधः इतिवत् रचयति। हस्तार्धं यावत् तथा वक्षसि च तण्डुलचूर्णेन लेपयति। रक्तवर्णतिलकं च धरति।

- दारुनिर्मितानि कङ्कणानि हस्तयोः धरति। इमानि कङ्कणानि स्वर्णफलकेन आच्छाद्य दर्पणाङ्गैः अलङ्क्रियन्ते च। स्वर्णवर्णयुक्तं शिरोभूषणं च नटस्य भवेत्। इदं भूषणं मुटी इति कैरल्यां कथ्यते। अस्य भूषणस्य पृष्टतः मध्ये ईषत् पार्श्वीकृतः कश्चन भागः त्रिकोणरूपेण दृश्यते। रक्तकृष्णवर्णैः अलङ्कृतस्य अस्य भागस्य अग्रतः विशिष्टं कौशेयवस्त्रम् आलम्बितम् स्थाप्यते। वर्तुलाकारयुतं कर्णाभरणम् किरीटधारणे नटाय अतीव रुच्यते एव।

# आङ्गिकाभिनयः

- चाक्यार्कूत्त् कलारूपे आङ्गिकाभिनयस्य न प्राधान्यं वर्तते। केरलीयकलारूपेषु दृश्यमानाः हस्तलक्षणदीपिकानुसृताः हस्तमुद्राः अस्मिन् कलारूपे अधिकतया न दृश्यन्ते। अस्मिन् तु प्रायेण लौकिकमुद्राणामेव प्रयोगः दरीदृश्यते। तर्जयति, नमस्करोति, आह्वयति इत्यादि सामान्यलौकिकव्यवहाराय लोके उपयुज्यमानाः हस्तमुद्राः एव अत्रापि उपयुज्यन्ते। तथापि अरालं, मुष्टि इत्यादि शास्त्रीयमुद्राः अपि उपयुज्यमानाः दृश्यन्ते।

# चाक्यार्कूत्

- एकेनैव नटेन बहूनां कथापात्राणां नटनम् इति एकांगाभिनयरीतिः सर्वत्र द्रष्टुं न शक्यते इति चाक्यार्कलारूपस्य महिमानं वर्धयति। न केवलं कथाकथनम् अपि तु कथायाः अभिनयोऽपि चाक्यार्जनानां पारम्पर्यम् अभूतपूर्व कलास्वन्यममत्वेन अद्यापि अनुवर्तते। प्राचीनकाले अस्य कलारूपस्य महिमा सम्यक् प्रकल्पिता आसीत्। न केवलं दर्शकानां इष्टतमं देवतानामपि कलारूपमिदं इष्टतममिति प्रशस्तिः श्रूयते।

# चाक्यार्कूत्

- अर्थात् पुरा चाक्यार्जनेन कूत् क्रियमाणे काले भक्तानां भगवद्दर्शनं असाध्यमासीत्। यतः भगवान् कूत् कलारूपं द्रष्टुम् तत्र सन्निहितः स्यात् इति सङ्कल्पः। कुत्रचित् भगवतः कृते केलीदर्शनार्थं सदस्येव एकस्मिन् पार्श्वे कौशेयवस्त्रं प्रस्तार्य पीठकल्पनम् क्रियते स्म।

# चाक्यार्कूत्त्

- पुरा देवमन्दिरेष्वेव प्रवर्तितं कूत्त्-कलारूपम् केवलं उन्नतकुलजातानां आस्वाद्योपाधिः आसीत्। पश्चात् नवोत्थानचिन्तकानां परिश्रमेण साधारणजनैरपि आस्वादयितुं योग्यमभवत् इदं कलारूपम्। अर्थात् देवमन्दिरान्तर्गतम् इदं कलारूपं देवमन्दिरात् बहिरपि आनेतुं चाक्यार्जनाः सिद्धाः अभवन्। तत्र केरलकलामण्डलं तत्सदृशकलापठनकेद्राणि च महत्योगदानम् अयच्छन्। हास्यरसप्रधानमिदं कलारूपं विश्वे सर्वत्र जनश्रद्धां आकर्षयति इत्यस्मिन् विमतिः नास्ति।

# नङ्यार्कूत्त्

- स्त्रीकेन्द्रीकृतं केरलेषु प्रचरितं प्रसिद्धं कलारूपं भवति नङ्यार्कूत्त्। कूटियाट्टम् कलारूपस्य नायिकायाः वेषं नम्ब्यार् कुडुम्बस्य स्त्रीजनाः एव कुर्वन्ति स्म। कूटियाट्टकलारूपस्य विकासः कुलशेखरवर्मणः शासनकाले एव समभवत्।
- काचन कथा- सः स्वस्य कृतौ सुभद्राधनञ्चये कल्पलतिकायाः निर्वहणत्वेन श्रीकृष्णचरितम् अयोजयत्। इदं निर्वहणं मन्दिरेषु प्रकाशयितुं नङ्यारजनेभ्यः अनुमतिश्च तेन प्रदत्ता। इदं पश्चात् नङ्यार् कूत्त् इति नाम्ना प्रथितोऽभवत्

# साहित्यम्

- कुलशेखरवर्मणः सुभद्रधनञ्जयनाटकस्य द्वितीयेऽङ्के मिश्रविष्कम्भकत्वेन चेट्या कल्पलतिकया क्रियमाणं प्रकटनमेव नङ्यार्कूत्त् कलारूपस्य एकमात्रं साहित्यम्। भूतस्य वलये पतितां कृष्णसोदरीं सुभद्रां अर्जुनः रक्षयति। द्वारकां प्रत्यागतवत्याः सुभद्रायाः नष्टगतां गात्रिकामन्विष्य प्रस्थितायाः कल्पलतिकायाः मनसि प्रतीयमानं श्रीकृष्णचरितमेव नङ्यार्-कूत्त्-कलारूपस्य इतिवृत्तम्।

# साहित्यम्

- यादवराजधान्याः मथुरापुर्याः उत्भवः, कंसस्य देवक्याः च जन्म, देवक्याः विवाहः, कंसेन प्राप्यमाणः शापः, बलभद्रस्य श्रीकृष्णस्य च अवतारौ, वृन्दावने श्रीकृष्णस्य बाललीलाः, पूतनामोक्षः, शकटासुरवधः, कालियमर्द्दनम्, गोपस्त्रीणां वस्त्रापहरणम्, रासक्रीडा, गोवर्धनोद्धारणम्, मथुरागमनम् , कंसवधः, जरासन्धवधः, द्वारकायाः निर्मितिः, सुभद्रायाः जननम् इत्याद्याः कथाः

# वेदी

- वेद्याः पुरतः मध्यभागे त्रिवर्तिभिः प्रज्वालितं दीपं स्थापयति। वर्तिकाद्वयं सदसः लक्षीकृत्य तथा एका वर्तिका दर्शकान् लक्षीकृत्य च भवति। नङ्यार्कूत्त् कलारूपस्य आरम्भे यवनिका उपयुज्यते, यथा कथाकेल्याम् उपयुज्यते। वेद्याः पृष्ठतः मध्यभागे मिषाव् नाम वाद्योपकरणं स्थाप्यते। अपि तु वामकोणे इटक्कावाद्यं च स्थाप्यते। वेद्याः दक्षिणतः मध्यभागे तालं यच्छन्ती गायिका उपविशति। नट्या उपयुज्यमानं पीठं वेद्याः वामभागे स्थाप्यते।

# क्रमः

- वेदिकाविधानम्, वन्दनम्, मिषाव्-वाद्यस्य शब्दकरणम्, गोष्ठि-कोट्टल्, नान्दी, निर्वहणम्, मंगलश्लोकोच्चारणम् इत्येवं भवति क्रमः।
- नङ्यार्कूत्त् निर्वहणरूपेणैव प्रदर्श्यते। एकस्याः पात्रान्तरनटनम् भवतीदम्। अस्य नटनस्य अनुक्रमः, संक्षेपः, श्लोकार्थाभिनयः इति चरणत्रयं वर्तते।

# क्रमः

- कथायाः पृष्ठतः गमनं भवति अनुक्रमः। अनुक्रमस्य श्लोकार्थाभिनयस्य च मध्ये विद्यमानः भागः भवति संक्षेपः। प्रलयकालस्य अन्ते ब्राह्मणः उत्पतिः तदनु तस्मात् समस्तप्राणिनां उत्भवः, यादववंशस्य उत्पत्तिः, मथुरापुर्याः आविर्भावः इत्यादि कथाभागाः अतिस्पष्टतया संक्षेपेणैव अत्राभिनीयन्ते।तदनु श्लोकार्थं नटति। उच्चार्यमाणाः श्लोकाः मनोधर्ममनुसृत्य यथोचितं नट्यन्ते। अभिनयानन्तरमेव श्लोकाः उच्चार्यन्ते।

# अभिनयः

- कूटियाट्टकलारूपस्य शैलीमेवानुसरति नङ्यार्कूत्त्-कलारूपम्। भरतमुनिना नाट्यशास्त्रे प्रतिपादिताः चतुर्विधाभिनयाः आङ्गिक-वाचिक-सात्त्विक-आहार्याः नङ्यार्कूत्त् कलारूपेऽपि भवन्ति।

- हस्तमुद्राभिः क्रियमाणः अभिनयः तत्र प्रधानः भवति। आङ्गिकाभिनयस्य विस्तारः कलारूपस्यास्य वैशिष्ट्यं भवति। इलकियाट्टम्, पकर्नाट्टम्, इरुन्नाट्टम् इत्यादि हस्तलक्षणदीपिकानुसारं प्रोक्ताः मुद्राः एव नङ्यार्जनेन कूत्त् मध्ये उपयुज्यन्ते।

# अभिनयः

- वाचिकाभिनयः पूर्णतया नेपथ्ये नियमितः भवति। अर्थात् नटी श्लोकोच्चरणं वा संभाषणं वा न करोति। वेदिकायाः पार्श्वे तिष्ठता नङ्यार्जनेनैव श्लोकाः उच्चार्यन्ते। ते श्लोकाः वाचिकाभिनयत्वेन परिगण्यन्ते।

# अभिनयः

- कथापात्रस्य मानसिकधर्माणाम् प्रतिफलनम् भवति सात्विकाभिनयः। अयं नवरसाधिष्ठितः भवति। प्रत्येकं रसस्य अभिनयप्रक्रमः अपि पूर्वनिर्धारितः भवति।
- कृत्त् निमित्तं अलङ्कृतः नाड्यार्जनः भगवती एव इति सकल्प अस्ति। रक्तवर्णपट्टा, शिरोभूषणम्, जपाकुसुमम्, केशे विद्यमानम् नागफलकं इत्याद्याः भगवती सङ्कल्पेन
म्यतामावहन्ति

# कृष्णनाट्टम्

- कृष्णस्य आट्टम् नृत्तम् वा इति व्युत्पतिः। कृष्णाष्टकम्, कृष्णाट्टम्, इत्यादीनि नामान्तराणि च कलारूपस्यास्य वर्तन्ते। कोषि़कोट् सामूतिरिणा मानवेदेन विरचितस्य कृष्णगीतिनामकस्य संस्कृतकाव्यस्य नृत्तसाहित्यरूपं भवति कृष्णनाट्टम्।

# कृष्णनाट्टम्

- केरलस्य इतरशास्त्रीयकलारूपाणां यः प्रचारो आसीत् तादृशप्रचारः कृष्णनाट्टस्यापि आसीदिति वक्तुं न शक्यते। यतः अद्यापि अनुष्ठानकलारूपेणैव इदं कलारूपं क्रियते। अत एव अस्मिन् अनुष्ठानांशेभ्यः महत्स्थानं वर्तते इति अवगच्छामः।

# स्वर्गारोहणम्- सन्तानगोपालम्



# इतिहासः

- मानवेदराजेन सम्बद्धं ऐतिह्यं सर्वे विश्वसन्ति।
- श्रीकृष्णस्य अवतारकथातः स्वर्गारोहणपर्यन्तं विद्यमानाः कथाः अष्टखण्डैः वेदिकायां अवतारयति। १.अवतारः, २.कालियमर्द्दनम्, ३.रासक्रीडा, ४.कंसवधः, ५.स्वयंवरः, ६.बाणयुद्धम्, ७.विविदवधः, ८.स्वर्गारोहणम्

# कृष्णनाट्टम्

- अवतारः सन्तानलब्ध्यर्थं, कालियमर्द्दनं विषबाधाशमनार्थं, कंसवधः दाम्पत्यकलहनिवारणार्थं तथा कन्यकाभ्यः ऐश्वर्यसिद्ध्यर्थं, स्वयंवरः विवाहविद्याभ्यासार्थं अपवादनिवारणार्थं च, बाणयुद्धं अभीष्टसिद्ध्यर्थं, विविदवधं कृषि-वाणिज्यमित्यादीनाम् अभिवृद्धयर्थं दारिद्र्यशमनार्थं च, स्वर्गारोहणं मोक्षप्राप्त्यर्थं च भवन्ति।

# साहित्यम्

- कृष्णनाट्टस्य कथासाहित्यं मानवेदराजेन रचितं कृष्णगीतिकाव्यं आश्रित्य प्रवर्तते।

- श्रीमद्भागवतम्, नारायणीयम्, गीतगोविन्दम् इत्येतानि त्रीणि भक्तिकाव्यानि आश्रित्यैव कृष्णगीतिः निर्मिता। श्रीमद्भागवतस्य दशम-एकादशस्कन्धयोः प्रतिपादितं श्रीकृष्णचरितमेव कृष्णगीतेः मूलम्

# वेदिका

- वेदिकानिमित्तम् उन्नतस्थानं न कल्प्यते, अर्थात् समतले एव वेदिका सज्जीक्रियते। क्रीडादीपस्य दिशं आश्रित्यैव वेदिकायाः स्थानं कल्प्यते। वेदिकायाः पृष्ठभागे मध्ये गायकाः तिष्ठन्ति। तम् उभयतः शुद्धमद्दलम्, तोप्पिमद्दलम् च स्थापयति। शुद्धमद्दलेन सह इटक्का नाम वाद्यविशेषोऽपि भवति।

# क्रमः

अवतारादिकथाः यथा अष्टखण्डैः वर्गीकृताः तथा च कृष्णनाट्टस्य प्रकटनमपि अष्टधा विभक्तम्। १.केलिकोट्ट्, २.अरङ्केलि, ३.तोटयम्, ४.वन्दनश्लोकः, ५.पुरप्पाट्, ६.कथावतरणम्, ७.धनाशिः, ८.मङ्गलश्लोकः च भवन्ति एते अष्टभागाः।

# अभिनयः

- आहार्यस्य तथा आङ्गिकस्य कृते कलारूपेऽस्मिन् विशिष्टस्थानं विद्यते। नाट्यस्य वा नृत्यस्य कृते प्राधान्यमदत्वा क्रियमाणं नृत्तं भवति कृष्णनाट्टम्। अस्य कानिचित् कथापात्राणि छायामुखं धृत्वा वेदिकायाम् आगच्छन्ति।
- कृष्णनाट्टे सर्वाणि कथापात्राणि पुरुषैः एव क्रियन्ते।
- अस्य मुख्यः भावः मुख्यः रसः च भक्तिरेव भवति।

# कृष्णनाट्टम्

- कृष्णनाट्टकलारूपे बाणयुद्धप्रकरणे कविकल्पितं घण्डाकर्णकथापात्रं सदुद्देशेनैव कृतमिति निश्चप्रचम्। परस्परं विभिन्नानां शैववैष्णवानुयायिनां सहयोगः एव मानवेदस्य काव्यरचनायाः परोक्षं लक्ष्यमिति वक्तव्यं भवति।अद्य कृष्णनाट्टं केवलं गुरुपवनपुरे मन्दिरे एव प्रवर्तमानं वर्तते।
- शैक्षणिकपाठ्यक्रमेषु पाठ्यक्रमत्वेन इतरानुष्ठानकलापठनकेन्द्रेषु वा कृष्णनाट्टं नाध्याप्यते । अत्र स्त्रीणां प्रवेशोऽपि निषिद्धः दृश्यते

# बाणयुद्धम्- नरकासुरवधम्



# विविदवधम्- किचेलवृत्तम्

